# Shri Samvid Ashtottarashata Namavalih

# श्रीसंविदष्टोत्तरशतनामावलिः

## Document Information

Text title : saMvidaShTottarashatanAmAvaliH

File name : saMvidaShTottarashatanAmAvaliH.itx

Category : devii, aShTottarashatanAmAvalI

Location : doc_devii

Transliterated by : Rajesh Thyagarajan

Proofread by : Rajesh Thyagarajan

Source : Shri Chitrapura Stuti Manjari, 2019

Acknowledge-Permission: Shri Chitrapur Math - Publications Committee https://chitrapurmath.net/

Latest update : June 5, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# श्रीसंविदष्टोत्तरशतनामावलिः

ॐ संवित्स्वरूपिण्यै नमः ।
ॐ देव्यै नमः ।
ॐ सदसद्रूपधारिण्यै नमः ।
ॐ स्वानन्दोज्जृम्भितायै नमः ।
ॐ भूम्ने नमः ।
ॐ स्वात्मभूतिप्रतिष्ठितायै नमः ।
ॐ जगत्प्रविष्टायै नमः ।
ॐ स्वच्छन्दायै नमः ।
ॐ शिवायै नमः ।
ॐ चित्ताब्जहंसिकायै नमः ।
ॐ शुद्धाशुद्धाध्वगायै नमः ।
ॐ स्पन्दशक्त्यै नमः ।
ॐ सोहंजपरतायै नमः ।
ॐ चिदाकाशायै नमः ।
ॐ चिन्मुकुरायै नमः ।
ॐ स्वबिम्बितजगत्-त्रयायै नमः ।
ॐ प्रतिबोधसुसंवेद्यायै नमः ।
ॐ मरीचिकृतविस्तरायै नमः ।
ॐ प्रत्यग्रूपायै नमः ।
ॐ पराकाष्ठायै नमः ।
ॐ पञ्चकोशविलक्षणायै नमः ।
ॐ पञ्चकृत्यायै नमः ।
ॐ निष्प्रपञ्चायै नमः ।
ॐ प्रणवार्थायै नमः ।
ॐ परावरायै नमः ।

ॐ सर्वोपाधिविनिर्मुक्तायै नमः ।
ॐ सर्वावस्थाविवर्जितायै नमः ।
ॐ सत्तास्फूर्तिपदद्वन्द्वायै नमः ।
ॐ दग्धकर्मेन्धनानलायै नमः ।
ॐ चिदग्निकुण्डसम्भूतायै नमः ।
ॐ ह्रींकार-रव-बोधितायै  नमः ।
ॐ चक्रान्तस्थायै नमः ।
ॐ चेत्यलयायै नमः ।
ॐ चराचरविलासिन्यै नमः ।
ॐ चित्सभा-नर्तक्यै नमः ।
ॐ विश्वचित्रभित्त्यै नमः ।
ॐ स्वयम्प्रभायै नमः ।
ॐ त्रिस्थायै नमः ।
ॐ त्रिगुणवेषाढ्यायै नमः ।
ॐ त्रिपुटी-त्रोटनोत्सुकायै नमः ।
ॐ देशिकायै नमः ।
ॐ दक्षिणायै नमः ।
ॐ दीक्षायै नमः ।
ॐ दहराकाशचन्द्रिकायै नमः ।
ॐ श्रीदक्षिणामूर्तिमुद्रायै नमः ।
ॐ अनुत्तमायै नमः ।
ॐ मौनवार्त्तिकायै नमः ।
ॐ श्रीशाम्भव्यै नमः ।
ॐ शिष्यपाशच्छेददक्षार्द्रवीक्षणायै नमः ।
ॐ सहस्रारायै नमः ।
ॐ सुधाधारायै नमः ।
ॐ सावित्र्यै नमः ।
ॐ कुलकुण्डल्यै नमः ।
ॐ सकलग्रन्थिभिदुरायै नमः ।
ॐ सोमार्कशिखिलोचन्यै नमः ।
ॐ विश्वरूपायै नमः ।
ॐ तैजसाख्यायै नमः ।

ॐ अव्यक्तसंज्ञायै नमः ।

ॐ अमृतकलायै नमः ।

ॐ विकल्पवर्जितायै नमः ।

ॐ मिथ्याकालदेशोत्थवैभवायै नमः ।

ॐ विक्षेपावरणास्पृष्टायै नमः ।

ॐ निर्निमेषायै नमः ।

ॐ विमर्शिण्यै नमः ।

ॐ इदम्पदायै नमः ।

ॐ अहंवदनायै नमः ।

ॐ मायाघटितमध्यमायै नमः ।

ॐ वेदागमस्तनितायै नमः ।

ॐ मात्रे  नमः ।

ॐ समरसाकृत्यै नमः ।

ॐ पण्डायै नमः ।

ॐ अखण्डाकारवृत्यै नमः ।

ॐ पूर्णाहन्तायै नमः ।

ॐ ऋतम्भरायै नमः ।

ॐ जूत्यै  नमः ।

ॐ मत्यै नमः ।

ॐ धृत्यै नमः ।

ॐ मेधायै नमः ।

ॐ प्रज्ञायै नमः ।

ॐ अविदितविप्लवायै नमः ।

ॐ चतुष्पदायै नमः ।

ॐ अपदायै नमः ।

ॐ वर्णमालायै नमः ।

ॐ वेदान्तभूमिकायै नमः ।

ॐ श्रद्धाङ्कुरायै नमः ।

ॐ सत्यमूलायै नमः ।

ॐ निष्ठाप्रोत्तुङ्गशाखिन्यै नमः ।

ॐ निर्वेदसलिलायै नमः ।

ॐ ब्रह्मचर्यसौन्दर्यपल्लवायै नमः ।

ॐ महावाक्यप्रसूनाढ्यायै नमः ।
ॐ कैवल्यफलदायिन्यै नमः ।
ॐ संसारतापशमन्यै नमः ।
ॐ शुकादिद्विजसङ्कुलायै नमः ।
ॐ ब्रह्मद्रुमायै नमः ।
ॐ अनन्तनीडकल्पब्रह्माण्डमण्डितायै नमः ।
ॐ आबालवृद्धविदितायै नमः ।
ॐ अनूतनायै नमः ।
ॐ अन्तर्मुखाश्रयायै नमः ।
ॐ आत्मचिन्तामण्यै नमः ।
ॐ चित्यै नमः ।
ॐ अध्यात्मज्ञानदीपिकायै नमः ।
ॐ अष्टधापूजितायै नमः ।
ॐ अद्वैतायै नमः ।
ॐ अनन्यभक्त्यैकसाधनायै नमः ।
ॐ निर्व्याजकरुणापूरायै नमः ।
ॐ निस्तरङ्गसुखार्णवायै नमः ।
ॐ सर्वचैतन्यरूपायै नमः ।
ॐ श्रीं  नमः ।

इति श्रीसंविदष्टोत्तरशतनामावलिः समाप्ता ।

Encoded and proofread by Rajesh Thyagarajan

*Shri Samvid Ashtottarashata Namavalih*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*